कुण्डलिनीविज्ञानरहस्यम्

श्रीब्रह्मचारी राजानकलक्ष्मणः, काश्मीरस्थगुप्तगङ्गान्तर्गतेश्वराश्रमवास्तव्यः ।

स्वाधारादुल्लसन्ती द्युतिविदितमहादिव्यतेजःस्वरूपा
षट्चक्रं स्फोरयन्ती गतिकृतमधुरध्वानमावेदयन्ती ।
प्राप्येशं तोषयन्ती दशशतकमले व्याप्य विश्वं स्थिता या
विश्वानन्दप्रवाहान् वितरतु भवतां कौलिकी कुण्डली सा ॥

अथ तन्त्रसम्मेलनसमारोहदिवसे मया कुण्डलिनीविज्ञानविषयमधिकृत्य यथाबुद्धि यथागुर्वाम्नायञ्च किञ्चित् प्रस्तूयते ।

सामान्यरूपतया पूर्णाहन्तारूपा शैवी विसर्गशक्तिः कुण्डलिनीति कथ्यते, या सार्धत्रिवलयाकारा आम्नायेषु प्रतिपाद्यते । तत्र प्रमेयप्रधानमहन्तारूपं कुण्डलिन्याः प्रथमो वलयः, प्रमाणप्रधानमहन्तारूपत्वं द्वितीयो वलयः, प्रमातृप्रधानमहंस्वरूपत्वं चास्यास्तृतीयो वलयः, तथावशिष्टार्धवलयः प्रमाप्रधानाहमात्मक इत्यस्या आगमिकी रहस्यप्रक्रिया ।

इत्येवंरूपा परविमर्शात्मासौ परा संविदेव यदा बहिरौन्मुख्यलक्षणात् स्वातन्त्र्यात्तत्तद्रूपतयाऽवविभासयिषया स्वात्मन्येव प्रोल्लसति, तदा सा परा शक्तिर्घटपटादिभावं स्वात्माभिन्नरूपतया विमृशन्ती सुप्ताहिसदृशी शक्तिकुण्डलिनीति सर्वाम्नायेषु निगद्यते । येयम्—

प्रकाश्यसर्ववस्तूनां विसर्गरहिता तु सा ।
[३-१३९]

इति श्रीतन्त्रालोकोक्तनीत्या विसर्गरूपापि विसर्गरूपतामनश्नुवाना स्वात्मन्येव चमत्कृतिमयी शिवस्याद्योन्मेषात्मिका शक्तिर्भवति ।

किञ्च, शैवशासनदृष्ट्या यदा योगी स्वात्माभिन्नशिवस्वरूपपरामर्शानुसन्धानवशाद्विश्वात्मसाक्षात्काररूपायां समावेशभूमौ तिष्ठति तदास्य विसर्गशक्तौ समावेशो जायते, येन स परमं शक्तिस्पन्दं स्वात्मनि चमत्कुर्वन् शक्तिकुण्डलिनीदशामाविशति । शक्तिकुण्डलिन्याः स्वरूपं तन्त्रसद्भावे यथा—

या सा शक्तिः परा सूक्ष्मा निराचारेति कीर्तिता।
हृद्विन्दुं वेष्टयित्वान्तः सुषुप्तभुजगाकृतिः॥
तत्र सुप्ता महाभागे न किञ्चिन्मन्यते उमे।
चन्द्राग्निरविनक्षत्रैर्भुवनानि चतुर्दश।
क्षिप्तोदरे तु या देवी विषमूढेव सा गता॥

सैव शक्तिकुण्डलिनी भगवती श्रीतन्त्रालोके—

कला सप्तदशी तस्मादमृताकाररूपिणी।

इत्यारभ्य—

प्रकाश्यसर्ववस्तूनां विसर्गरहिता तु सा।
शक्तिकुण्डलिका.....॥

इत्यन्तं निरूपितास्ति। परापराशक्त्यपरपर्यायाया विसर्गशक्तेरियं बीजात्मिका मध्यमा दशा भवति। अस्या विसर्गशक्तेराद्यन्तदशयोर्वर्णनं प्राणकुण्डलिनी-पराकुण्डलिनीनिरूपणावसरे भविष्यति।

कामकलापरामर्शानुसारेण कौलयोग्यपि चर्याक्रमे तां शक्तिकुण्डलिनीं सिद्धयोगिनीसङ्घट्टात्मकसमावेशावसरे कामतत्त्वरूपतया साक्षात्करोति। यदाहुराचार्याभिनवगुप्तपादाः—

अत एव विसर्गोऽयमव्यक्तहकलात्मकः।
कामतत्त्वमिति श्रीमत्कुलगुह्यर उच्यते।
कामस्य पूर्णता तत्त्वं सङ्घट्टे प्रविभाव्यते॥

[तं० ३-१४६]

श्रीवातूलनाथाचार्येणापि—

"सिद्धयोगिनीसङ्घट्टान्महामेलापोदयः"

इत्यस्मिन् सूत्रे महामेलापशब्देन सेयं शक्तिकुण्डलिनी निरूपिता, यस्यां क्षणमात्रमपि स्थितिं प्राप्य कौलयोगी वेद्यवेदकात्मशिवशक्त्यात्मद्वयविगलनेन तां शिवशक्त्यात्ममहासामरस्यरूपां स्थितिमनुभवति—इत्यस्यां सिद्धयोगिनीसङ्घट्टात्ममहामेलापदशायां शक्तिकुण्डलिनीदशामनुभवन् यः कौलयोगी चर्याक्रममाचरति,

स एव चर्याक्रमेऽधिकृतोऽस्ति, नान्य इत्यवधातव्यम्। तस्मात् परिपूर्णस्वात्मावमर्श-निष्ठानां पूर्णाशयानामेवास्मिन्निरुत्तरसमावेशास्पदे चर्याक्रमेऽधिकारो नेतरेषाम्। यदाहुः श्रीक्षेमराजपादाः—

ते नात्राधिकृताः परैः पुनरिदं पूर्णाशयैश्चर्व्यताम्।
[स्पं० नि०]

अथ प्राणकुण्डलिनीस्वरूपं निर्णीयते। चिच्चमत्कृतिरूपा विसर्गशक्तिः,

स्वात्मनः स्वात्मनि स्वात्मक्षेपो वैसर्गिकी स्थितिः।
[तं० ३-१४१]

इत्याचार्याभिनवगुप्तपादोक्तया स्वात्मन्येव विसर्गस्योन्मेषदशां परामृशन्ती 'प्राक् संवित्प्राणे परिणता' इति नयेन प्राणनरूपतां चावभासयन्ती प्राणकुण्डलिनी-रूपतयागमेषु निरूप्यते। यद्यप्यस्यां प्राणकुण्डलिनीरूपायां विसर्गशक्तौ प्राणन-रूपत्वाद्बहिर्भावावभासनात्मिका स्थितिर्दृश्यते; तथाप्यत्र प्राणादिपञ्चवाहस्यानुन्मी-लनात् स्वात्मानन्दचमत्कृतिमयत्वमेव सर्वतः प्रवर्तते। इयमेव प्राणकुण्डलिनीरूपा चितिशक्तिर्विसर्गस्यादिकोट्यात्मनि स्वरूपे स्फुरतीति कौलयोगिभिरनुभूयते। अत्र तु स्वानुभवसारमपि किञ्चिन्मया वर्ण्यते—

तामाश्रित्योर्ध्वमार्गेण चन्द्रसूर्यावुभावपि।
सौषुम्नेऽध्वन्यस्तमितौ हित्वा ब्रह्माण्डगोचरम्॥
तदा तस्मिन् महाव्योम्नि प्रलीनशशिभास्करे।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः॥
[स्पं० २४-२५]

इति श्रीवसुगुप्तपादप्रतिपादितनयेन यदा शैवयोगी क्षणमप्यवधानशैथिल्य-मसहमानः सततमेव शिवात्मभावमनुसन्दधानः समावेशदशायामुन्मुखो भवति, तदास्य स्वात्मानुसन्धिबलादेवोभौ प्राणापानौ सौषुम्ने मार्गे लयं गच्छतः, तदनन्तरमस्य प्राण-शक्तिर्मूलाधारपदवीमाश्रयते। तस्मान्मूलाधारान्मध्योर्ध्वमार्गेण प्रोच्छलन्त्यां विकस्वरायां प्राणशक्तौ योगी प्राणकुण्डलिन्यवस्थामनुभवति।

अत्र [प्राणकुण्डलिनीसमावेशदशायां] योगिनां द्वे गती भवतः। तत्राद्या यथा—केषाञ्चिद्यदा प्राणापानौ मध्यमार्गे लयं गच्छतस्तदा प्रथमं तावदधोमुखौ सन्तौ लम्बिकास्थानं भित्त्वाङ्गुलिपिहितकर्णघोषवद् ध्वनन्तौ मूलाधारचक्रं वेधयतः, तदास्य योगिनो मूलाधारचक्रमुक्तप्रकारेणैव सशब्दं पूर्णवेगेन परिवर्तत इति योगी प्राथम्येनानुभवति। ततो मूलाधारचक्रादुत्थिता मध्यवाहिनी प्राणशक्तिर्द्वितीयं नाभिस्थानगतं चक्रं वेधयति, यद्वशात्तद्द्वितीयमपि नाभिचक्रं वेगेन सशब्दं परिभ्रमति। तदानीं योगी यौगपद्येनानयोश्चक्रयोः परिवर्तनदशामनुभवति। तदनु तस्य योगिनः प्राणशक्तिर्नाभिचक्रात् समुत्थाय वेगेन हृच्चक्रं वेधयित्वोर्ध्वं गच्छति, तदा स योगी हृच्चक्रस्यापि वेगेन परिवर्तनदशामनुभवति। ततः कण्ठस्थानमाप्ता सा मध्यवाहिनी प्राणशक्तिः कण्ठस्थानगतं चक्रमेवं भ्रूमध्यस्थानगतं चक्रञ्च वेगेन वेधयति, यद्वशात्ते उभे चक्रे अपि वेगेन परिवर्तेते—इत्यस्य योगिन एवानुभवगोचरत्वमेति। इत्थं बिन्दुस्थानगतं चक्रं वेधयित्वायं योग्यस्यां प्राणकुण्डलिनीस्पन्दनदशायां मूलाधारचक्रस्थानादारभ्य भ्रूमध्यस्थानगतचक्रपर्यन्तानां समस्तानां चक्राणां यौगपद्येन सवेगं परिवर्तनरूपत्वमनुभवति, यदनन्तरमेव योगिनमणिमाद्यष्टसिद्धयः समाश्रयन्ते। अमुमेवाशयं वेधदीक्षाविचारावसरे आचार्याभिनवगुप्तपादाः श्रीतन्त्रालोक उपोद्बलयन्ति—

वेधदीक्षा च बहुधा तत्र तत्र निरूपिता।
सा चाभ्यासवता कार्या येनोर्ध्वोर्ध्वप्रवेशतः॥
शिष्यस्य चक्रसंभेदप्रत्ययो जायते ध्रुवः।
येनाणिमादिका सिद्धिः.....॥

[२९।२३७-२३८]

अथापरा सृतिर्यथा—केषाञ्चिच्च मन्दयोगिनां मध्यनाड्यां यदा प्राणापानावस्तं गच्छतस्तदा तेषां परमेश्वरशक्तिपातस्य मन्दत्वादेव मध्यवाहिनी प्राणशक्तिर्विपर्ययेणैव प्रथमं भ्रूमध्यस्थानगतं चक्रं वेधयति, यद्वशादस्य योगिनस्तच्चक्रं प्रथमं सशब्दं घूर्णते। तदनु कण्ठस्थानगतं चक्रं ततो मूलाधारस्थानं यावदखिलानि चक्राणि सशब्दं परिवर्तन्ते, येन तस्य योगिनः संसारवासनायास्तत्रावस्थितत्वेन न किञ्चिदनुभवगोचरत्वमेति। अणिमाद्यष्टसिद्धीनां कथा तु दूरापास्तैव; प्रत्युत स योगी निम्नाङ्कितेन पिशाचावेशेन समाविष्टो भूत्वा विघ्नपरम्परामेवानुभवति। यदुक्तं श्रीरत्नमालायाम्—

अधोऽवस्था यदा ऊर्ध्वं संक्रामन्ति वरानने।
सैव मोक्षपदावस्था सैव ज्ञानस्य भाजनम्॥
ऊर्ध्वचक्रगतावस्थाः यदाधः संभवन्ति च।
तदा पैशाच आवेशः स वै विघ्नस्य कारणम्॥

अथ कामकलां परामृशन् योगी सिद्धयोगिनीसङ्घट्टावसरात्मके चर्याक्रम इमां प्राणकुण्डलिनीदशां विषतत्त्वप्रवेशसमयेऽनुभवति। पूर्वोक्तरूपायां महामेलापदशायामादौ या दशा ह्यनुभूयते, सैव विषतत्त्वरूपागमेषु वर्णितास्ति। श्रीकुलगुह्यतन्त्रे इयमेव वेधदीक्षा मन्त्र-नाद-बिन्दु-शाक्त-भुजङ्ग-परेतिरूपा षोढा वर्णिता—

मन्त्रवेधं तु नादाख्यं बिन्दुवेधमतः परम्।
शाक्तं भुजङ्गवेधं तु परं षष्ठमुदाहृतम्॥

वेधदीक्षाषट्कस्य स्वरूपमधस्तान्निर्दिश्यते। मूलाधारचक्रादुत्थिता पूर्णाहन्तात्मकमन्त्रस्वरूपा प्राणकुण्डलिनी पूर्णाहन्तावलात् समस्तानि चक्राणि वेधयन्ती आदिमा मन्त्रवेधदीक्षेति कथ्यते। मध्योर्ध्ववाहक्रमेण च प्रोच्छलन्ती नादाकारा सा द्वितीया नादवेधदीक्षेति भण्यते। वीर्यस्वरूपा सा प्राणकुण्डलिनी समस्तं चक्रवर्गं वेधयन्ती तृतीया बिन्दुवेधदीक्षेति नाम्ना व्यपदिश्यते। शक्तिरूपतामापन्ना चक्रवेधनक्रियापरा सा तुर्या शाक्तवेधदीक्षा भवति। सर्पाकारतामादधाना चक्रवेधनञ्च कुर्वाणा व्युत्तिष्ठन्ती भुजङ्गवेधदीक्षा पञ्चमी। पराशक्तिरूपतामाश्रयन्ती समस्तचक्रवेधनशीला सा परवेधदीक्षा षष्ठीति।

अथ पराकुण्डलिनीस्वरूपं विमृश्यते—परचितिरूपा विसर्गशक्तिर्यदान्तर्भावोन्मुख्यरूपान्तःकोट्यात्मनि स्वरूपे स्वात्मानं चमत्कुर्वाणा पूर्णाहन्तात्मके पद इदन्तासमावेशं तथेदन्तात्मके पदे पूर्णाहन्तायाः समावेशं कुर्वती समाधिव्युत्थानसामरस्यदायिनीं क्रममुद्रारूपां जगदानन्दस्वरूपात्मिकां पराकुण्डलिनीदशां प्रकाशयति। जगदानन्दस्य लक्षणं श्रीतन्त्रालोके यथा—

यत्र कोऽपि व्यवच्छेदो नास्ति यद्विश्वतः स्फुरत्।
यदनाहतसंवित्तिपरमामृतबृंहितम्॥

यत्रास्ति भावनादीनां न मुख्या कापि संगतिः।
तदेव जगदानन्दमस्मभ्यं शम्भुरूचिवान्॥
[५-५१,५२]

अत्रापि स्वानुभवानुसारं मया किञ्चिल्लिख्यते—तीव्रशक्तिपातभाजनस्य शिवयोगिनः प्राणा यदा सौषुम्ने मार्गे समाविशन्ति, तदा तस्य प्राणशक्तिर्मध्योर्ध्ववाहक्रमेण षट्चक्रवेधनक्रममस्पृष्ट्वैव ब्रह्मरन्ध्रस्थानमासाद्य चिदानन्दस्वरूपा भवति। इत्थं तस्य योगिनः क्रममुद्रायां समावेशो जायते। क्रमसूत्रेषूक्तम्—

"क्रममुद्रया अन्तःस्वरूपया बहिर्मुखः समाविष्टो भवति साधकः। तत्रादौ बाह्यादन्तः प्रवेशः, आभ्यन्तराद्बाह्यस्वरूपे प्रवेश आवेशवशाज्जायते। इति सबाह्याभ्यन्तरोऽयं मुद्राक्रमः" इति।

किञ्चेदृशीं समावेशदशामनुभवन् समावेशचमत्कृतिबलादेव व्युत्थानेऽपि समस्तं भावजातं चिद्गगने लीयमानं पश्यन् योगी यदा किञ्चित् किञ्चिद् व्युत्तिष्ठति, तदा तस्य सर्वाणीन्द्रियाणि प्राणापानसहितानि क्षणं प्रादुर्भूय स्वात्मन्येव लीयन्ते, इत्थं स हिण्डोललीलावदुभयतः प्रसरन्तीमन्तर्बहिःसमावेशात्मिकां दशामनुभवन्नेव पराकुण्डलिनीधाम प्रविशति, येनास्योर्ध्वकुण्डलिनीरूपायां क्रियाशक्तौ समावेशो जायते, यद्वशात् कौलयोग्यपि सिद्धयोगिनीसङ्घट्टवेलायां निरञ्जनपदभाग् भवति। उक्तं हि—

"क्रियादेवी निरञ्जनम्" इति।

एवं कामकलारहस्याभिप्रायेण कामतत्त्वमिच्छाशक्तौ, विषतत्त्वं ज्ञानशक्तौ, निरञ्जनतत्त्वञ्च क्रियाशक्तावन्तर्भवन्ति। तथेच्छाशक्तिः शक्तिकुण्डलिनीति, ज्ञानशक्तिः प्राणकुण्डलिनीति, क्रियाशक्तिः पराकुण्डलिनीति च तत्र तत्र शिवागमेषु व्यपदिश्यते॥